# भवनभूषण-भूषणभवन काव्य

**- सं. उपा. भुवनचन्द्र**

अमारा संग्रहमांनी एक अपूर्ण प्रतिमांथी मळेलुं आ चमत्कृतिसभर काव्य अपूर्ण छे- त्रुटित छे. ११ पत्रनी प्रतना प्रारम्भना पांच पत्र नथी. रचना अष्टक प्रकारनी छे पण आठ-आठ श्लोकोनुं बन्धन कविए स्वीकार्युं नथी. चोथा अष्टकनो अन्तिम श्लोक मळे छे जे नवमो छे. अष्टक ५, ६, ७मां नव-नव श्लोक छे. आठमा अष्टकमां आठ श्लोक पूरा थया पछी फरी एकथी नव श्लोक आप्या छे, ते पछी आठमुं अष्टक पूरुं थाय छे. त्यार बाद बे श्लोक छे जेमां कविनी गर्वोक्ति छे.

प्रत शुद्ध करेली छे. अक्षरो मरोडदार अने विशाल छे. लाल अने काळी - एम बे शाहीनो उपयोग थयो छे. ज्यां ज्यां लहियानी भूल थई छे तेवा स्थाने संमार्जन थयेलुं छे. पदच्छेद, संशोधन तथा टिप्पण सूचववा माटे सम्पूर्ण प्रतमां लिपिचिह्नो छूटथी वपरायां छे. प्राचीन लेखनपद्धतिमां लिपि चिह्नोनो प्रयोग कई रीते थतो हतो ते समजवा आ प्रति एक नमूनानुं काम आपे एवी छे.

कोईक विद्वान मुनि अथवा पण्डिते काव्यना कठिन शब्दो, कूटस्थानो वगेरेनुं स्पष्टीकरण करतां टिप्पणो लख्यां छे. शाही उखड़ी जवाथी क्यांक क्यांक शब्दो पूरा वंचाता नथी अथवा अस्पष्ट वंचाय छे. प्रति सोळमा शतकनी जणाय छे.

कृतिना रचयिता **वाचक साधुहर्ष** छे. अन्तिम श्लोकमां कर्ता कहे छे के **विद्वान लक्ष्मण**ना अनुरोधथी, **सुमतिलाभ** माटे **साधुहर्षे** आ रचना करी, कर्ताना गुरु, गच्छ के समयनो निर्देश प्रतमां के कृतिमां नथी. कर्ता तथा कृतिना रचनाकाल विशे विशेष तपास थई शकी नथी.

कृतिना अन्ते 'भुवनवर्णने भवनभूषणे भूषणभवने' एवो उल्लेख छे तेथी 'भवनवर्णन' एवुं नाम मानी शकाय परंतु प्रत्येक अष्टकना अन्ते 'भवनभूषणे भूषणभवने' ए ज लखेलुं छे, तेथी ए नाम वधु योग्य लागे छे. काव्यनो

विषय श्री नेमिकुमारना लग्ननो प्रसंग छे. मुख्यत्वे नेमिकुमार तथा नेमिकुमारनो महेल- ए बन्नेनुं वर्णन एक साथे थाय तेवी द्व्यर्थक रचना छे परन्तु राजीमती, द्वारिका, रैवताचल आदिनुं वर्णन पण आमां सामेल छे.

चित्रकाव्य होवाथी एकाक्षर, द्व्यक्षर, छत्रबन्धादि बंध, श्लेष, यमक, वगेरे आ काव्यमां प्रचुर रीते प्रयोजाया छे. अनेकार्थक श्लोको, प्रहेलिका अने शब्दचातुरी पण एटला ज प्रमाणमां जोवा मळे छे. शब्दचातुरीनो एक नमूनो - (अ. ४, श्लोक ९)

''रम्यवदना राजीमती, तारा वरनुं नाम बहु सुंदर छे, ते मने कहे ने!'' - सखी.

''शैवेय'' - राजीमती.

''एटले शिवानो पुत्र ने ? तो शुं ए गणपति छे के पछी शियाळ छे ?'' - सखी. (शिवा = दुर्गा, तथा शिवा = शियाळी)

''नहि, नहि, आयुष्मती, ए तो माधवना बन्धु छे'' - राजीमती.

''कृष्णना बन्धु एटले हलधर बलराम ज ने ?''

''ना, ना, नेमि'' - राजीमती

''तो शुं चन्द्र छे ?'' - सखी.

- राजीमतीनी सखीओनी वरसम्बन्धी आवी शब्दलीलावाळी वाणी शोभी रही छे.''

अहीं श्लोकमां चन्द्र माटे कवि 'चमाः' शब्द वापरे छे. टिप्पणमां आनो अर्थ 'हिमकर' अर्थात् चन्द्र दर्शाव्यो छे. आ शब्द कोशमां जडतो नथी. आवुं केटलुंक कविसम्प्रदायथी ज जाणी शकाय. कूटकाव्य/चित्रकाव्य होवाथी रचना यद्यपि क्लिष्ट छे तो पण बुद्धिने चमत्कृत करनारी होवाथी रसप्रद बने छे. कविनी विद्वत्ता, कल्पनाशक्ति, शब्दसमृद्धि, रचनाचातुरी काव्यमां झळहळी रहे छे. अन्तिम श्लोकमां कवि स्वयं कहे छे :-

''(आ काव्य वांचीने) ईर्ष्याळुनुं मुख वक्र थशे अने मन्दमतिवाळानी काया संकोच पामशे.'' अर्थात् शरम अनुभवशे.

राजसभाओमां पाण्डित्यप्रदर्शनना युगमां आवी रचनाओ करवानी कविओने प्रेरणा मळती. प्रस्तुत रचना पण आवी कोई स्पर्धा साथे जोडायेली होय अथवा पोताना शिष्य आदिना विनोद अर्थे पण कदाच रचाई होय.

काव्य अने तेना कर्ता विशे वधु विगतो कोई विद्वज्जन रजू करशे तो आनन्द थशे.

★ ★ ★

. . . . . . . . . . . . . . .

'रम्यं ते वरनाम वामवदने राजीमति ! ब्रूहि मे ?'
'शैवेयः' 'किमु पर्शुपाणिरथ किं गोमायुरायुष्मति ! ?'
'नो, श्रीमाधवबान्धवः' 'किमु हली ?' 'नो नेमिराले' 'चमा?'[१]
इत्थं राजि[२]मतीवरसखीवररति[३]श्रीभारती राजते ॥९॥*

इति श्रीभवनभूषणे भूषणभवने चतुर्थाष्टकम् ।

[५]

न खगतिश्च कवर्गगतिस्तव
करगतिर्नरनायकसङ्गतेः ।
सुजलशङ्ख इयाय महागतिं
स्तुतिविधायक एष्यति तद् घनाम् ॥१॥ द्रु०

श्रीमन्तौ मुनिचारुशब्दनिकरं सम्यग् ब्रुवन्तौ स्थिरा
अङ्गस्त्री महती महावसुमती साराङ्गराजीमती ।
श्रीमत्सौर्यपुरे महोत्सवजनी श्रीद्वारकावासिनौ
राजेते वरपुष्पगन्धमहिता आर्वा[४]सनेमी उभौ ॥२॥ शार्दू०

---

१. हिमकरः । २. राजी तथा राजिरिति रूपद्वयेन न दोषः । राजिमतीपतिदग्धरतीशतद्गुरुतां..... इति श्रवणाच्च तथात्र ह्रस्वेन तनुह्रस्वताकरणं ज्ञेयमिति व्यङ्ग्यम् । ३. भर्तृक्रीडा तस्या श्रीभारती । ४. अजाद्यन्तत्वात् पूर्वनिपातः । * इत्थं राजिमतीसखीवररति० आम पाठ होय तो छन्दोभङ्ग थतो अटकी शके.

राजच्छङ्खो[५] महेशो मलयजमहितो रम्यभूमध्यवासो
जैनो नानाप्रबन्धः शयसितकमलः[६] कामिनीगीतगीतः ।
रम्योद्वाहे सुवाहे ध्वजगजनिवहे पद्गरथ्याधिपत्ये
सच्छ्रीसर्वेक्ष्यमौलिर्विमलचमरयुक् छत्रितोऽयं विभाति ॥३॥ स्रग्धरा०

नेमेः पर्यस्तिकायाः किमुत वरहरेः पाणिसंस्थः सुकम्बू
रूप्यौघो मौक्तिकाप्तः किमुत सुजलधेः[७] फेनपिण्डोऽप्यखण्डः ।
किंवा कर्पूरपूरातिसुरभिमलयप्रोद्भवप्राप्तशामा
वामोरुस्थूलमूलोद्धतकुचकलसो[८] वा सतां सूपदेशः[९] ॥४॥ स्रग्धरा०

ऐन्द्रो हस्तीह वोच्चैः किमुत हिमनगोनग्रलब्धा[१०]रंकीर्तेः
पुञ्जो[११] दातुर्गिरीशप्रकटवृषभको मूर्तिमज्जैनधर्मः ।
स्थाणुः स्थाणोर्विभूतिप्रचुरभगिरिजोरोज इन्द्रस्सुहांसो (?)
हासो वा श्रैधरास्यः किमुत विमलभावाससां राशिवासः ॥५॥ स्रग्धरा०

ऊहे तं (?) पक्षिराजः किमुत शशिहयो-य इन्द्रस्य सम्यङ्
मन्ये गाने मुनी द्वौ किल निजशिरसी घर्षयन्ताविति द्वौ ।
नायं नायं न चायं ह्ययमय मयकं नायमेषो यमेष
नायं नायं न चासावयमयमयकं श्रीवरावास एव ॥६॥

श्रग्धराछन्दांसि । त्रिभिर्विशेषकम् ।

सा-र्थं नै(नौ?)म्यहं नेमिं सार्थं नत्वा सदा नमिम् ।
श्रीशादारं(?) नरैभावं श्रीमत्सदर्थभानवम् ॥७॥

श्लोकः । छत्रबन्धचित्रम् ।

नेतारं वा तारं गाने नेमिं भा आदानं मेने ।
श्रीआवासं शोभासारं श्रीदातारं देवैः सारम् ॥८॥

विद्युन्माला । द्वितीयछत्रबन्धचित्रम् ।

---

५. पाञ्चजन्यः, मङ्गलार्थं ध्वनिः । ६. शये हस्ते सिता उज्ज्वला कमला लक्ष्मीर्यस्य स शय०; शये शयने सितानि कमलानि यत्र स शय० । ७. क्षीरसमुद्रस्य । ८. कुचकलसेतिकरणात्पुनरु-रोनेतिकरणे न दोषः । वा पुनः करणं देवमनुष्यवशाविशेषख्यापनार्थमिति । ९. सुकथनं १०. गति । ११. तथात्रौघवृन्दपुञ्जराशि इत्येतयोरेकार्थत्वात् पूर्वपदभिन्नत्वात् अत्रादोषता ।

सेवा देया यादेवासे नेमे देवं वन्देऽमेने ।
त्वामस्त्रि नानास्त्रि मत्वा सारांगातोतो गारांसाम् ॥९॥ विद्युन्माला
।

आज्ञाज्ञातश्च दारास्तो मण्डने ज्ञोस्य मूलतः ।
आज्ञाज्ञातश्च दारास्तो मण्डनेऽज्ञोस्य मूलतः ॥१०॥ अनुष्टुप् ।

इति श्री भवनभूषणे भूषणभवने पञ्चमाष्टकम् ।

६ । अथ पूर्वर्णनम् ।

पूरत्तादृत एव वेत्ति न परश्चार्यागतिं सुन्दराम्
मात्रामत्रमनन्तसिद्धिफलदं दूराय नांह्रीयुतम् ।
चार्यागत्युचितादशेषरहिता निश्शेषमौलिस्थितात्
पात्रापात्रविशेषचेतिति परापूर्वप्रणीतात्स्फुटम् ॥२॥ शा० ॥

पूःपूर्वेव परा परापदहतिप्राणिव्रजे सद्दया
सूर्याद्या सुरमण्डलीस्वरुचिराचार्षिका कर्षिका ।
नित्योदारविभाजनाहतभया भव्यावलीमण्डिता
भातीह प्रबला बला बलवती श्रीनाथनेमीशतः ॥३॥ शा० ॥

श्रीतोया दवदग्धिकासुगुणगुः प्राकारसीमाभया
नानानारदवर्त्तिकाऽर्जुनकथा वा कोपलक्ष्याक्षया ।
तापी पाति परीक्षिता हयगजा श्री औजयंती ह्यतः
सूर्याघा नगरी विभाति सततं श्रीद्वारकेव स्फुटम् ॥४॥ शा० ॥

प्रसरशिशिरभावा माधवश्रीस्वभावा
स्वपतिमिलनतापा द्रव्यवर्षाप्रतापा ।
सुहृदुदयसरिद्भा जन्मवेलैकसद्भा
सघनभवनधन्या भाति पूराजकन्या ॥५॥ मालिनी ॥

उच्चाधोगुणनां कुतूब(ह?)लसरत्प्राणेह सोस्नेहदां
भूयो लोकविवाससो लघुसृतिप्रक्षीणराजत्कटीम् ।
नाभीकूपसुरोमवल्लिपलिदां तत्स्तूपनृत्यत्कुचां

रम्यास्यामयमाप पापरहितां नारीमिवैव क्षमाम् ॥६॥ शा०

दध्युज्ज्वलाभेन यका तवाङ्गेऽदे-स्ति नो इष्टगृहे ग्रहे च ।
यद्भूतिमद्गर्ज्जघणेस्थित-किं सा शुनो नो रथयायिनश्के ॥७॥ इन्द्रवज्रा ।

अव्यक्तशब्दव्रजपूर्वकेतिः सन्नीतिमार्गप्रवणः पुराणः ।
सर्वप्रियप्रेतिविनाशहेतु-र्मेघो यथा मेघद एष भाति ॥८॥ इन्द्रवज्रा ।

लात्वे मां पृतनां विमुच्य परमां रामां च कामागमा
गर्जद्गर्जहयोदयध्वजरथा सत्पद्गतुर्यव्रजाम् ।
प्रीतां भावभृतां सतीं दुरितराट्संपीडनात्खण्डितां
प्रापावासविभुर्दयां वसुमतीराजीमतीतापदाम् ॥९॥ शार्दू० ।

इति श्रीभवनभूषणे भूषणभवने षष्ठाष्टकम् ।

पूरामा त्वयका विना च सहसा त्यक्तास्यहास्यानघ
स्वाभां स्वापदवीक्षणाद् हिमयुतां श्रीहीरिकां मुञ्चता ।
उच्चैः स्थापितबाहुकोमलकरां साराङ्गराजीमतीं
श्यामां चारुदतीं सतीं वरमहे हूहूपुरासुन्दरे ॥१॥ शा० ।

**आचार**रीतिं स्वकुलस्य चक्रे
**वैवाहप्रज्ञप्ति**निवेदकायः[१२] ।
**श्रीसूत्रकृत्स**द्वचसा मुदेङ्य-
**स्थानादरौघ**[१३]**वरदान**विधानसत्कः ॥२॥ इन्द्र० ।

**ज्ञाता**प्रवृत्तेरथ चोग्रसेन
**उपासक**स्याशुदशार्हकस्य ।
पूर्वैरिदे**हान्तकरः** स्थिराङ्गः
**सानुत्तरः प्रश्नविपाक**दर्शी ॥३॥ युग्मम् ॥ इन्द्र० ।★
भवति भवत ईतेर्नाश आशून्नतेश्च
बलपरभवसिंहे वह्निरात्रौ[१४]स्वरूपः ।
भवनभवननाथ प्रोल्लसल्लोकगाथः

१२. विसर्गो चित्रभङ्गाय न । १३. समवायः ।
★ २-३ पद्योमां ११ अङ्ग-आगमोनां नामो वणी लेवायां छे.

विशद-दशवामिर्मा भवावो नवामः(?) ॥४॥

अखिलभुवननामन् वर्णनीयौ-धामन् (?)
त्रिदशपतिनतांह्रे मुक्तिजाने सुबर्ह ।
मतिधृतिगुणपूर्णस्फारतौसद्वयाणः
जगति महति लोकैः श्लोकगाथाभिरीक्ष्यः ॥५॥

सयममममनतौ ते त्वन्तरङ्गी श्वदेव
दलितदुरिततापो वायुवाङ्गोऽङ्गचित्तम् ।
निजधृतिजितवायू★ तोयमारात्यहंजित्
भवजलतरनावां श्रेयसामावकायम् ॥६॥
ॐ मालिनीछन्दांसि । त्रिभिर्विशेषकम् ।

श्री रूपा ३ अ-ावो[१५] इउऋतृ(लृ)[१६]उदितिर्मे नतिः प्राणिनाथ
मां सत्संयोगयोगां जगदसुमदनोऽमन्मनाः श्रीजनाप्तः ।
हे ए ऐं ऊ च ऊ रेहि तितउसदृशं संप्रबोध्याशु वध्वा
गन्त्री गन्त्रीव भूत्वा स्यवसनमदने नानये चेदनायम्+ ॥७॥ श्रग्धरा

सेवकः शेखरः सादरं सागरः शङ्करः पावनं भूघनो भूतलम् ।
आदिवर्णैर्विनेमानि वस्तूनि मे त्वां विना दौर्जलो भस्मनि प्राणिनि ॥८॥
स्रग्विणी

गोपतेर्दौर्जनं[१७] श्चायसो हाडिकं सन्ति सन् सद्हृदः साम्प्रतं मत्प्रिय ! ।
मां विना ते समानीह तानि प्रभो ! तत्प्रभोस्तैः प्रशस्यास्य हास्यानघः ॥९॥

---

१४. आं त्राति आत्रः, आत्रश्चासावों च आत्रौं, आत्रौंस्वरूपः - लक्ष्मीपप्रणवसहज इत्यर्थः । १५. उ खेदे । १६. इ उ ऋ तृ (लृ) इति ह्रस्वाक्षरप्रमाणा उदितिरूर्ध्वगतिर्यस्य स इउऋतृ(लृ) उदितिर्वा इउऋतृ(लृ) वर्णैः उदितिरूर्ध्वगतिर्यस्य स मध्यमपदलोपी समासः । ★ चित्तविशेषणं । + नय एव नायो नयमार्गः स्वार्थे, ततो नास्ति नायो यस्य सोऽनायोऽनयी इत्यर्थः, तं तथा, वा नास्ति आयो लाभो यस्य [सोऽनाय] स्तं तथा । १७. कीदृशं वनं दौर्ज्जनं दुर्जनानामिदं दौर्जनं वा दुर्जनाः सन्ति अत्र दौर्ज्जनं । अस्त्यर्थेऽण् । कीदृशं दरं भयं गर्त्तो वा 'गर्ते दरस्त्रिषु भयो दरोऽस्त्रिया'मिति **यतीन्द्रः** । दुर्जनानामिदं दौर्ज्जनं दरं, चकारादस्याप्येतदेव विशेषणं ज्ञेयम् ।

स्रग्विणी

इति भवनभूषण-भूषणभवने सप्तमाष्टकम् ।

८

पट्टनपत्तनसारनिवासः सेवकसेवकनुत्यावासः ।
मोदक मोदक शोभनिवासो यच्छति यच्छति सं घनिवासः[१८] ॥१॥

तोटकम्

वरभविमलनाथं दूरतस्त्वाविशेषं[१९]
लघुतरकरणाद्वा पण्डिताः खण्डितास्ते ।
वरभविमलनाथं दूरतस्त्वाविशेषं
लघुतरकरणाद्वा पण्डिताः खण्डितास्ते ॥२॥

अथ श्रीपतिवर्णनम् ।

अर्हत्सेवी जगद्वन्द्यः श्यामवर्णविराजितः ।
नरसिंहः सदानन्दः श्रीपतिर्जयति ध्रुवम् ॥३॥ अनेकार्थमनुष्टुप् छन्दः ।

नृपाख्यादौ वशाकूतिः (श्रीः)

---

१८. सं सुखे यच्छति सति घनिवासः । शरीरिणो वासो वस्त्रं यच्छति । १९. हे नाथ त्वामिति। त्वां ते पण्डिताः वरभ-विमलनाथं लघुतरकरणाद्विदुः अतः कृष्णात् विशेषं यथा स्यात्तथा मलनाथमित्यर्थः । कस्मात् लघुतरकरणादर्थान्म त्यजनात् । हे विमल, विगता मा येषां ते विमास्तान् लाति विमलस्तस्य नाथस्तं, दलिद्राधि-पतिमित्यर्थः । पुनर्वरभ० वरभाश्च ते वयश्च वरभवयस्तेषां बलं अनिष्टशब्दत्वान्मलेत्यस्य कथनं वरभविमलं तस्य नाथस्तं । विदूरतो विशेषदूरस्थाः, कीदृशास्ते ? ते पण्डिताः । पण्डिताः खण्डिताः पण्डितैः आ इति खेदे, खण्डिताः सुदोषीकृताः वा पण्डितासा पण्डितासनेन खण्डिताः । पण्डिताः खण्डिताः । वा आपं । आं पाति आपः कृष्णस्तं आपं । डो व्यञ्जनं डकारव्यञ्जनं, तेन इता गता डिता इत - - - रहिता इत्यर्थात्कृष्णं गता इत्यर्थः । पुनः विशेषं खण्डिताः । तु पुनः, आ समन्तात् । अस्य वा विशेषो यत्र तदाविशेषं यथा स्यात्तथा । ते । ते तव पण्डिता - इति त्वां हे वर हे भ, विमलनाथं लघुतरकरणात् जितेन्द्रियत्वात् । पुनर्लघुतरकरणात् ऊकारस्य ह्रस्वीकरणात् विदुः । कीदृशं नाथं - - विमलनाथं । २०. अग्रस्थकश्रवणादत्र केतिपदग्राह्यः ।

कः[20] कुर्यात्ससुखं पुरम् । (पतिः)
ब्रह्मचारिशिरोमौलि-यतीड्यः श्रीपतिश्च सः ॥४॥ अनुष्टुप्

अथ काचित् सुजनशि [क्षा । (?)]

सत्केशमो(मौ)ली रतिरूपरम्या नामाभिरामा मितहर्षकामा ।
उच्चैस्तनद्वन्द्ववतीह रामा पुण्यं विना नो भवता च लभ्या ॥५॥
इन्द्रवज्रा

सम्पद्विपत्प्राप्त्यविमुक्तसङ्गा वादेऽविवादा[21] सरुषीतिरोषा ।
सुप्ते तु सुप्तोत्थित[22] उत्थितैव छायेव मोच्या न वशा स्वका ज्ञैः ॥६॥
इं०

लब्धोदया षट्सुखं[23]मावहन्ती नीलाम्बरा स्वस्य गणे प्रधानम् ।
मध्यागं[24]रम्या रमणीयशब्दा नारी तटीव प्रथमा न हेया ॥७॥ इं०

विस्मापितो या दयया तटिन्या सार्वैरपि प्राणपरैरलङ्घ्या[25] ।
प्रीत्या स नेमिर्विपशून्[26] विमोच्य सूर्यादिमां[27] प्राप पुरं वरोयम् ॥८॥
इं०

अथ जिनोऽपि मनोभवभीतिभिद् वितरणं तरणाय च वार्षिकम् ।
सुविधिना[28] विधिनामनिवारकः[29] पशुविधौ[30]★वि विधाय शुभं[31] ययौ ॥१॥

२१. नास्ति वादो यस्यां साऽविवादा । वा विः पक्षी, तद्वद्वादो जल्पनं यस्याः सा विवादा । न विवादा अविवादा, वीणावादा इत्यर्थः । २२.. उत्थिते सति । २३. षण्णां सुषमा षट्सुषमा, षड्वसुशोभा, तां. । २४. गिरिरम्या । २५. लङ्घितुमशक्या । २६. विगताः पशवो येभ्यस्ते विपशवस्तान्विपशून् जनान् । किं दुःखमेतेषां तन्निषेधार्थस्त्वयं । वयश्च पक्षिणः पशवो मृगाद्यास्ततो द्वन्द्वेऽविरोधित्वाद्वा 'प्राण्यङ्गादीना'मित्यनेन वैकल्पिकबहुत्वं । वा वियुक्ताः पक्षियुक्ताः पशवो विपशवस्तान्विपशून् । युक्तशब्दलोपः । २७. सूरिर्विद्वानेव अः कृष्णः सूर्यः, स एवादौ यस्याः सा सूर्यादिमा तां, तथा पुरं द्वारकामित्यर्थः । २८. पुण्येन २९. विधातृनामविच्छेदकः । ३०. क्रमे । ३१. कल्याणं । ३२. सुता मृगादयस्तेषां रुतानि शब्दास्तैरा
★ इ इति लक्ष्मीं मङ्गलार्थं सम्बोध्य जिनं स्तुवन् रैवतकाचलं स्तौति ।

सुतरुताम[३२]सतामरसावृतं सुम[३३]नसां मनसां सुखदायकम् ।
ललितबा[३४]लकबालकभाजन[३५]-ममितरैमतिरैवतकाचलम् ॥२॥ द्रु० ।

वसुमती सुमती[३६]शसुरप्रियं कपिकलासुकलापिगुरुं गुरुम् ।
मृगपतत्र्यगपत्रभरस्वरं सर उदा[३७]रमुदारमनो[३८]हरम् ॥३॥

तरणतारणरीतिविशारदं मुनिवरव्रजसेवितकन्दरम् ।
प्रतिपदं विधिमण्डितमन्दिरं घनतटीतटताडकपाटकम् ॥४॥
चतुर्भिः कलापकम् ।

सुरवधूसुरवो वरविक्रमो जिनगृहे[३९]नग्रहै[४०]नमरीचिभिः[४१] ।
अ[४२]र्यमपि [४३]स्पृहणीयविभो विभुर्बहुमहिः स्वमहीनमहीभृताम्[४४] ॥५॥

---

समन्तात् मा माया येषां ते सुतरुतामाः, सुतरुता-माश्च ते सन्तश्च तापसास्तेषां सुतरुतामसतां, अरसा गतश्रीस्तया वृतस्तं । यद्वा तमःसमूहस्तामसं, सुतरूणां तामसं सुतरुतामसं अन्धकारसमूहः अपारवृक्षनिवासत्वात् । तामरसानि कमलानि तैरावृतस्तं । यद्वा सुतरुता च मश्च शिवः, सतो भावः सता, श्लेषेन लोपः, अमरसा च अमरश्रीः । सुतरुतामसतामरसास्ताभिरावृतस्तं तथा। यद्वा सुशोभनास्तरवो येषां ते सुतरवः, एवंभूता ये तापसाः सुतरुतापसास्तेषां तापस्तपनं, सुतरुतापसतापस्तस्य रसा सुतरुतापसतापरसा, तया आवृतः सुत० तं तथा । [वा] सुतरव एव तापसाः सुतरुतापसास्तेषां तापस्तपनं, तस्य रसा भूमिस्तयाऽऽवृतंस्तं तथा । सुतरुतापसतापरसावृतमिति पाठान्तरार्थद्वयं । यद्वा - - - - - - - प्रकरणात् सरागता, अस्य ज्ञानस्य रसो अरसो ज्ञानामृतरसस्तेन आवृतस्तं । ३३. देवानां सज्जनानां वा पुष्पानां(णां?) । ३४. सजलधरातो निस्सरणाद्बालं नवीनं यत् कं जलं बालकं, ललितं यद्बालकं ललितबालकं, तेन बालकभासा सा नवीनकान्तयो जना यत्र स तं। तथा यद्वा बालकं वनस्पतिविशेषं बालकं नवीनजलं च । बालकं च बालकं च बालकबालके, ललिते ये बालकबालके ललितबालकबालके, तयोर्भाजनं ललितबा० । यद्वा ललितवालैर्युक्तं कं मस्तकं येषां ते ललितवालकाः, एवंभूता ये बालकाः शिशवो ललितबालकबालकास्तद्भाः, सुजना यत्र स तं । अंबिकेष्मि (?) तयात्रां कर्तुकामागतसतंत्र बालकबालकभांसि विलोकितुं स्थितलोक इति भावः । ३५. अमिता रा द्रव्यं येषां तेऽमितरायस्तेषां मतिर्यत्र स एवंभूतो यो रैवतिकाचलः अ० तं तथा । ३६. वसुमती च सुमतीशश्च सुराश्च वा सुमतीशसुरश्च नेमिस्तेषां प्रिय इष्टस्तं तथा । ३७. ऊर्ध्वलक्ष्मीः । ३८. ननूदारमनोहरयोः को विशेषो ? य एवोदारार्थः स एव मनोहरार्थः । पुनरुक्तिद्युतिरत्र। तच्छिदियम् - उद् ऊर्ध्वं य आरो गमनं उदारः, तेन मनोहरः । ३९. स्वामी । ४०. सूर्यः । ४१. ऋषिकविप्रसिद्धं नाम, आद्यचक्रिसुतस्य च । ४२. उज्जयन्तः । ४३. [व]र्तते इति शेषः । ४४. निन्दायै सु अमो रोगो येषु ते स्वमा

जिनपतामसमांग[४५] गिरिं यति[४६] स्वपतिमार्गमुदारकमाददे[४७][४८] ।
अभयभावनभावनभासुर-प्रियमपि प्रमदा प्रमुदा सह ॥६॥ द्रु० ।

स जयति जिननेमिः श्रीवरावासवासः
स जयति जिननेमिः श्रीवरावासवासः ।
स जयति जिननेमिः श्रीवरावासवासः
स जयति जिननेमिः श्रीवरावासवासः ॥७॥

अ[अं]त्यस्योपरि शब्दानां विस्तरोऽत्र विचार्यताम् ।
कुत्रचित्तस्थयोगोऽपि प्राघूर्णकसमोऽस्ति सन् ॥८॥
व्यतन्वन् **साधुहर्षा**स्सत् **सुमतिलाभ**हेतवे ।
**विद्वल्लक्ष्मण**निर्देशा-दावासवर्णनं लसत् ॥९॥

इति भवनवर्णनभवनभूषणे भूषणभवने अष्टमाष्टकम् ।

भक्त्या वा(वो)ज्झितपातकाः क्षितितले वो वै नमस्कारका
ये भव्या नृभवं मुदेत्यविपुलं पुण्यं प्रकुर्वन्ति ते ।
अर्हन्तो भवदाशिषा स्थिरहृदः श्राद्ध विभान्तूद्धतात् (?)
संख्यावद्यतयः श्रुताच्छमतयोऽस्मत्काव्यभव्यार्थिनः ॥१॥
मात्सर्यासो निजं वक्त्रं वक्रं ह्यतः करिष्यति ।
गतां च हीनतां सत्यं क्षुद्रकास्तस्य विग्रहः ॥२॥

वाचक साधुहर्षगणिविरचिते सदुचिते
भूषणभवनभवनभूषणकाव्यं सम्पूर्णमिति। श्रीरस्तु लेखकवाचकयोः ।

जैन देरासर, नानी खाखर-३७०४३५, कच्छ, गुजरात

---

अतीवरोगाः, तैर्हीनाः स्वमहीना एवंभूता ये महीभृतः पर्वतास्तेषां १ । यद्वा स्वयुक्ता मही स्वमही, तस्या इनाः स्वामिनः स्वमहीनाः, एवंभूता ये महीभूतस्तेषां, तथा २ । यद्वा स्वेन द्रव्येण महो येषां ते स्वमहिनः स्वोत्सवा, एवंभूता इना राजानो यत्र ते स्वमहीनाः, एवंभूता ये महीभृतस्तेषां ३। यद्वा अस्य महः अमहः कृष्णमहोत्सवः, अमहो विद्यते येषां ते अमहिनः, सुष्ठु शोभना अमहिनः स्वमहिनः, तेषांमिना येषु ते सु(स्व)महीनाः, एवंभूताश्च ते महीभृतश्च तेषां तथा ।४। यद्वा स्वेन मा येषां ते स्वमाः, तैर्हीनाः, शेषं तथैव, इत्थमन्येऽप्यर्था यथाबुद्धि कार्याः । स्वमहीनं यथा स्यात्तथा, अहीभृतां, अहयश्च इश्च अहयः, ताबिभर्त्ति(?) अहीभृतस्तेषां तथा। ४५. सप्तकूटं । ४६. गच्छति सति। ४७. उदारेण उद्गमनेन कं सुखं यत्र स उदारकस्तं तथा, वा उदारकं कमनीयं कं पानीय यत्र स उदार०, तं तथा सुअमः स्वमः । सु इति अमेति शेषस्तुतिः । ४८. जग्रहे ।